International Journal of Emerging Research in Arts, Science and Technology
Volume 1 | Issue 6 | September 2026 | ISSN: 3139-5252 (Online)
Available online at: https://ijerast.com/
DOI: https://doi.org/10.67715/ijerast.v1i6.36

# दीपिकानिरुक्तिनयोः तर्कसंग्रहस्य पदार्थसमीक्षणम्।

**Narugopal Das**
Ph.D. Research Scholar, Dept. of Sanskrit, Vidyasagar University, Midnapore, West Bengal
**Email:** naru.gopal.das.san@gmail.com

**Received:** 07 September 2026 | **Accepted:** 20 September 2026 | **Published:** 30 September 2026

**सारांशः**

*दुःखनिवृत्तिप्रयोजनमवलम्ब्य दर्शनशास्त्रस्य सृष्टिः अभवत्। दृश्- धातोः उत्तरं **'करणाधिकरणयोश्च'** सूत्रेण ल्युट्- प्रत्ययेन दर्शनशब्दस्य व्युत्पत्तिः भवति। चक्षुरिन्द्रियादिसहायेन वाह्यविषयाणां ज्ञानलाभः अत्र न अभिप्रेतः। भारतीयदर्शने दर्शनशब्दस्यार्थः भिन्नः। **"दृश्यते साक्षात् क्रियते तत्त्वम् एभिरिति दर्शनानि।"** अर्थात् येन तत्त्वपोलब्धिः भवति तत् दर्शनम्। दर्शनेन तत्त्वज्ञानं भवति। अत्र तत्त्वस्य अर्थात् यथार्थज्ञानस्य विषयः आत्मा। अतः वक्तुं शक्यते दर्शनमित्यस्यार्थः तत्त्वदर्शनम्, आत्मदर्शनम्, आत्मोपलब्धिर्वा। आत्मज्ञानेन हि दुःखस्य चिरनिवृत्तिः भवति। भारतीयदर्शनम् आस्तिकनास्तिकभेदेन द्विविधम्। आस्तिकाः वेदस्य प्रामाण्यं स्वीकुर्वन्ति, नास्तिकाः तु वेदनिन्दकाः। मनुसंहितायाम् आलोच्यत- **'नास्तिको वेद-निन्दकः'**। आस्तिकश्रेण्याम् अस्ति न्यायः वैशेषिकः सांख्यः योगः मीमांसा वेदान्तश्च। नास्तिकश्रेण्याम् अस्ति चार्वाकः जैनः बौद्धश्च। सर्वे आस्तिकदार्शनिकाः मोक्षोपायं प्रदर्शयन्ति। भिन्नोपायेषु येषां दार्शनिकानां मतसाम्यं परिलक्ष्यते ते समानतन्त्रदर्शनं इत्यभिधीयते। यथा १) सांख्यं योगश्च। २) वैशेषिकः न्यायः च। ३)मीमांसा वेदान्तश्चेति। समानतन्त्रदर्शनेषु न्यायवैशेषिकदर्शनयोः प्रकरणग्रन्थः तर्कसंग्रहः। प्रकरणग्रन्थसहायेन मुख्यशास्त्रविषये जिज्ञासुजनः सहजोपायेन विषयज्ञानं भवति। तर्कसंग्रहग्रन्थस्य मूलविषयाः सरलरूपेण वोधार्थं प्रायः पञ्चविंशत्याधिकाः टीका परिदृश्यन्ते। तासाम् अन्यतमा दीपिकाटीका। तर्कसंग्रहस्य दीपिकाटीका अन्नंभट्टेन विरचिता। पुनः एका टीका प्राप्यते निरुक्तिः। तर्कसंग्रहस्य निरुक्तिटीकायाः कर्ता जगन्नाथशास्त्री। अत्र दीपिकाटीकायाः समालोचना दृश्यते। यद्यपि अन्नंभट्टेन तर्कसंग्रहे आदौ पदार्थलक्षणं विशेषरूपेण न कृतं परन्तु शोधपत्रे उल्लिखितयोः द्वयोः टीकयोः पदार्थस्वरूपम् आलोचितम्। कथं अन्नंभट्टेन आदौ पदार्थलक्षणं न कृत्वा पदार्थविभागः कृतः इत्यस्य समाधानम् अस्मिन् शोधपत्रे आलोच्यते। तर्कसंग्रहकारेण अन्नंभट्टेन कथम् तर्कंग्रहस्य आदौ द्रव्यादिपदार्थाः आलोचिताः इत्यस्य समाधानम् अस्मिन् शोधपत्रे आलोच्यते। अन्नंभट्टेनोल्लिखिते **'द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः'** इति अंशे कुत्रापि प्रत्यक्षरूपेण पदार्थस्य विभागः भावाभावरूपेण न प्राप्यते। अभावपदार्थस्य प्रत्यक्षोल्लेखः प्राप्यते परन्तु को भावपदार्थः तस्य परिचयोऽत्र प्रत्यक्षरूपेण न परिदृश्यते। कथम् अन्नंभट्टेन स्पष्टरूपेण पदार्थस्य भावाभावरूपेण विभागः न कृत्वा द्रव्यादिभेदेन कृतं तत् आलोचितम्। दीपिकानिरुक्त्योः पदार्थस्य भिन्नलक्षणं प्राप्यते। **दीपिकाटीकायां** पदार्थलक्षणम् उल्लिखितम्-**"पदस्यार्थः पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणम्।"** निरुक्तिटीकायां पदार्थलक्षणं प्राप्यते-**"ज्ञेयत्वं पदार्थलक्षणम्।"** अतः तर्कसंग्रहस्य दीपिकानिरुक्त्योः तुलनात्मकमध्ययनेन कस्याः टीकायाः पदार्थलक्षणं उत्तमं कथं च इत्यस्य विचारः शोधपत्रस्य पदार्थस्वरूपविचारांशे क्रियते।*

***मुख्यशब्दाः**- दर्शन, समानतन्त्र, प्रकरण,पदार्थ, अभिधेयत्व, ज्ञेयत्व*

## भूमिका

दुःखनिवृत्तिप्रयोजनमवलम्ब्य दर्शनशास्त्रस्य सृष्टिः अभवत्। अतः जिज्ञासा जायते दर्शनं किम्? दर्शनशब्दस्य कोऽर्थः? इत्यादयः। दृश्- धातोः उत्तरं 'करणाधिकरणयोश्च'[1] सूत्रेण ल्युट्- प्रत्ययेन दर्शनशब्दस्य व्युत्पत्तिः भवति। पाणिनिना धातुपाठे दृश्- धातोः अर्थः कृतः 'दृशिँर् प्रेक्षणे।'[2] इति प्रेक्षणशब्दस्य अर्थः दर्शनं ज्ञानमनुधावनं वा। चक्षुरिन्द्रियादिसहायेन वाह्यविषयाणां ज्ञानलाभः अत्र न अभिप्रेतः। भारतीयदर्शने दर्शनशब्दस्यार्थः भिन्नः। "दृश्यते साक्षात् क्रियते तत्त्वम् एभिरिति दर्शनानि।" अर्थात् येन तत्त्वपोलब्धिः भवति तत् दर्शनम्। दर्शनेन तत्त्वज्ञानं भवति। अत्र तत्त्वस्य अर्थात् यथार्थज्ञानस्य विषयः आत्मा। अतः वक्तुं शक्यते दर्शनमित्यस्यार्थः तत्त्वदर्शनम्, आत्मदर्शनम्,

[1] अष्टाध्यायी ३/३/११७।

[2] धातुपाठः ०१.११४३

This is an open access article under the Creative Commons Attribution-Non-Commercial 4.0 International License.
© The Author(s) 2026. IJERAST Published by Cognitive Helix Publishing.

आत्मोपलब्धिर्वा। तत्त्वशब्देन बोध्यते "सतश्च सद्भावोऽसतश्चासद्भावः"[3] अर्थात् सत् वस्तोः सत् रूपेण ज्ञानम्, असत् वस्तोः असत् रूपेण ज्ञानं तत्त्वम्। आत्मज्ञानेन हि दुःखस्य चिरनिवृत्तिः भवति।

भारतीयदर्शनम् आस्तिकनास्तिकभेदेन द्विविधम्। आस्तिकाः वेदस्य प्रामाण्यं स्वीकुर्वन्ति, नास्तिकाः तु वेदनिन्दका। मनुसंहितायाम् आलोच्यत- **'नास्तिको वेद-निन्दकः'**।[4] आस्तिकश्रेण्याम् अस्ति न्यायः वैशेषिकः सांख्यः योगः मीमांसा वेदान्तश्च। नास्तिकश्रेण्याम् अस्ति चार्वाकः जैनः बौद्धश्च। तेषु भारतीयदर्शनेषु चार्वाकदर्शनमृते सर्वाणि भारतीयदर्शनानि परमपुरुषार्थरूपेण मोक्षं स्वीकुर्वन्ति। मोक्षशब्देन दुःखस्य चिरनिवृत्तिः बोध्यते। दर्शनशास्त्रं मोक्षलाभोपायं ज्ञापयति इत्यनेन तच्छास्त्रं मोक्षशास्त्रनाम्नापि अभिधीयते। मोक्षलाभोपायः भिन्नः वर्तते। सर्वे आस्तिकदार्शनिकाः मोक्षोपायं प्रदर्शयन्ति। भिन्नोपायेषु येषां दार्शनिकानां मतसाम्यं परिलक्ष्यते ते समानतन्त्रदर्शनं इत्यभिधीयते। यथा १) सांख्यं योगश्च। २) वैशेषिकः न्यायः च। ३)मीमांसा वेदान्तश्चेति।

समानतन्त्रदर्शनेषु न्यायवैशेषिकदर्शनयोः प्रकरणग्रन्थः तर्कसंग्रहः। प्रकरणग्रन्थस्य स्वरूपं प्राप्यते-

**"विस्तरेण प्रकुर्वन्ति केचित् प्रकरणात्मना।**
**शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितम्।।**
**आहुः/प्राहुः प्रकरणं नाम ग्रन्थभेदः विपश्चितः।**
**सूत्रभाष्यादिभिः शास्त्रं साक्षात् वेदनसाधनम्॥"**[5]

अर्थात् यस्मिन् ग्रन्थे कस्यचित् एकस्य शास्त्रस्य विषयं प्रधानरूपेण प्रतिपादनकाले प्रयोजनानुसारेण सम्बन्धितशास्त्रस्य विषयाणां प्रतिपादनं भवति, सः ग्रन्थः पण्डितजनैः प्रकरणग्रन्थः इत्यभिधीयते। प्रकरणग्रन्थे शास्त्रस्य प्रमुखविषयानां प्रतिपादनं भवति। प्रकरणग्रन्थसहायेन मुख्यशास्त्रविषये जिज्ञासुजनः सहजोपायेन विषयज्ञानं भवति। सामान्यरूपेण न्यायवैशेषिकदर्शनयोः प्रकरणग्रन्थाः द्विधा- न्यायदर्शनप्रधानप्रकरणग्रन्थाः वैशेषिकदर्शनप्रधानाप्रकरणग्रन्थाः च। यत्र न्यायदर्शनस्य षोडशपदार्थानां प्रतिपादनसमये वैशेषिकदर्शनस्य केषाञ्चित् पदार्थानां आलोचनाः परिदृश्यन्ते ते न्यायदर्शनप्रधानप्रकरणग्रन्थाः। यथा भासर्वज्ञकृतो 'न्यायसारः', केशवमिश्रस्य 'तर्कभाषा' इत्यादयः। यत्र वैशेषिकदर्शनस्य सप्तपदार्थानां प्रतिपादनसमये न्यायदर्शनस्य केषाञ्चित् पदार्थानां आलोचनाः परिदृश्यन्ते ते वैशेषिकप्रधानप्रकरणग्रन्थाः। यथा शिवादित्यमिश्रस्य 'सप्तपदार्थी', जगदीशतर्कालङ्कारस्य 'तर्कामृतम्' इत्यादयः। अन्नंभट्टस्य तर्कसंग्रहग्रन्थेऽपि वैशेषिकदर्शनस्य सप्तपदार्थानां प्रतिपादनसमये न्यायदर्शनस्य प्रमाणपदार्थस्य मुख्यरूपेण आलोचना प्राप्यते। अतः तर्कसंग्रहः वैशेषिकप्रधानप्रकरणग्रन्थः।

न्यायवैशेषिकदर्शनयोः मूलावधारणानां परिचायको विद्यते तर्कसंग्रहग्रन्थे। तर्कसंग्रहाख्यः प्रकरणग्रन्थः श्रीमता अन्नंभट्टेन प्रणीतः।[6] तर्कसंग्रहग्रन्थस्य मूलविषयाः सरलरूपेण वोधार्थं प्रायः पञ्चविंशत्याधिकाः टीका परिदृश्यन्ते। तासाम् अन्यतमा दीपिकाटीका। तर्कसंग्रहस्य दीपिकाटीका अन्नंभट्टेन विरचिता।[7] तर्कसंग्रहस्य निरुक्तिटीकायाः कर्ता जगन्नाथशास्त्री।[8] अत्र दीपिकाटीकायाः समालोचना दृश्यते। यद्यपि अन्नंभट्टेन तर्कसंग्रहे आदौ पदार्थलक्षणं विशेषरूपेण न कृतम् परन्तु शोधपत्रे उल्लिखितयोः द्वयोः टीकयोः पदार्थस्वरूपम् आलोचितम्।

मनुष्याः सदा प्राकृतिकवस्तुभिः चतुर्दिक्ष्वेषु आवृताः भवन्ति। प्राकृतिकवस्तूनां परिवर्तनानि अपि तैः परिदृष्टानि। जिज्ञासुजनाः परिवर्तितानां प्राकृतिकवस्तूनां प्रयोजनानि उपलभ्य वैशिष्ट्यनुसारेण तेषां नामकरणं कृतवन्तः। नाम्ना तेषां परिचयः लभ्यते। यथार्थपरिचयेन तेषां लोकव्यवहारः सम्यगरूपेण भवन्ति। नाम विना वस्तोः चिन्तनम् असम्भवम्। नाम्ना वस्तु ज्ञानस्य विषयः भवति। व्याकरणशिक्षालाभेन जनाः प्राकृतिकवस्तूनां नामकरणाय पदस्य प्रयोगः कृतवन्तः। अतः पदेन न केवलं प्राकृतिकवस्तूनां नामकरणं भवति अपि तु सर्वेषां प्रयोजनीयानां विषयाणां नामकरणानि भवन्ति। यस्य विषयस्य परिचयार्थं पदस्य प्रयोगः क्रियते स तस्य पदस्य अर्थः अर्थात् पदार्थः भवति। सर्वेषु शास्त्रेषु स्वविषयज्ञातार्थं पदस्य प्रयोगः परिदृश्यते।

दर्शनशास्त्रेऽपि प्रयोजनीयानां विषयाणां ज्ञातार्थं पदस्य प्रयोगः परिदृश्यते। दर्शनशास्त्रे यस्य अर्थस्य विषयस्य वा ज्ञातार्थं पदं प्रयुज्यते स एव तस्य पदस्य अर्थः अर्थात् पदार्थः। शोधपत्रे आलोचितस्य तर्कसंग्रहग्रन्थस्य आदौ अन्नंभट्टेन भणितम्- **"द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः"**।[9] अर्थात् पदार्थः सप्त यथा द्रव्यं गुणः कर्म सामान्यं विशेषः समवायः

[3] न्यायदर्शनम्(वात्सायन कृत भाष्यसह), पृष्ठासंख्या-२

[4] मनुसंहिता, द्वितीयोऽध्यायः, श्लोकसंख्या १।

[5] पराशरोपपुराणम्, अष्टादशाध्याय, श्लोकसंख्या- २१,२२।

[6] तर्कसंग्रहः,सम्पा. श्रीनिवासशर्मा, पृष्ठासंख्या-१३

[7] New Catalogus Catalogorum, Volume- VIII, Column-b, Page No-125

[8] New Catalogus Catalogorum, Volume -VIII, Column-b, Page No-125

[9] तर्कसंग्रहः, सम्पादकः आचार्य श्रीनिवास शर्मा, पृष्ठासंख्या ७।

अभावश्चेति। तर्कसंग्रहग्रन्थे प्रयोजनीयविषयाणां ज्ञातार्थं द्रव्यादीनां सप्तपदानां प्रयोगः तेन कृतः। यस्य अर्थस्य ज्ञातार्थं द्रव्यादिपदानां प्रयोगः अन्नंभट्टेन कृतः स एव तस्य पदस्य अर्थः पदार्थः वा।

## तर्कसंग्रहस्य आदौ पदार्थलक्षणं विहाय पदार्थविभागस्य कारणविचारः-

**'उद्दिष्टस्य लक्षणं लक्षितस्य विभागः'** इति नियमानुसारेण पदार्थस्य सामान्यलक्षणात् अनन्तरं पदार्थलक्षणं करणीयम्। परन्तु अन्नंभट्टेन उद्दिष्टस्य अर्थात् पदार्थस्य लक्षणं न कृत्वा लक्षितस्य अर्थात् पदार्थस्य विभागः कृतः। अत्र प्रश्नः जायते कथं अन्नंभट्टेन आदौ पदार्थलक्षणं न कृतम्? शोधपत्रे आलोचितासु टीकासु दीपिकाटीकायाम् अस्याः समस्यायाः उल्लेखः नास्ति। अस्याः समस्यायाः उल्लेखः तथा च समस्यायाः समाधानं यथार्थरूपेण निरुक्तिटीकायां परिदृश्यते। अत्र प्राप्यते ''सामान्यलक्षणकथनानन्तरमेव विभागस्य कर्तव्यत्वात्। यथा तत्र गन्धवती पृथिवी इत्यनेन पृथिवीसामान्यलक्षणमुक्त्वा, सा द्विविधेति तद्विभागः श्रूयते, तथा न चेह पदार्थसामान्यलक्षणमुक्तम्। अतस्तद्विभागेऽनुपपन्न इति चेत् न। तर्कसंग्रह इति वाक्यघटकीभूततर्कपदेन तल्लक्षणस्योक्तप्रायत्वात्। तथा हि तर्क्यन्ते ज्ञायन्ते इति व्युत्पत्त्या तर्कपदेन द्रव्यादिपदार्थाः उच्यन्ते, तेन ज्ञेयत्वं पदार्थसामान्यलक्षणं इति लभ्यते। अन्नंभट्टस्तु पदस्यार्थः पदार्थः इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणम् इति लभ्यते इत्यनेन विभागवाक्यघटकपदार्थपदेनैव सामान्यलक्षणलाभं मन्यते।"[10] अत्र एकं समाधानं प्राप्यते यत् तर्कसंग्रह इति पदे उल्लिखितेन तर्कपदेन द्रव्यादिपदार्था आदौ प्राप्यन्ते। तर्क्यन्ते ज्ञायन्ते इति व्युत्पत्त्यनुसारेण तर्कपदेन द्रव्यादिपदार्थाः बोध्यन्ते। अत्र तर्कपदस्य व्युत्पत्त्यनुसारेण ज्ञेयत्वं पदार्थलक्षणं प्राप्यते। पदस्यार्थः पदार्थ इति रूपेण यदि व्युत्पत्तिः क्रियते तर्हि विभागवाक्यस्यान्तर्गतेन पदार्थपदेन अभिधेयत्वरूपं इति पदार्थस्य सामान्यलक्षणं प्राप्यते। अतः पुनः तर्कसंग्रहग्रन्थे आदौ पदार्थपदस्य लक्षणं निस्प्रयोजनीयमिति। तर्कसंग्रहस्य **'विरला'** नाम एका टीका प्राप्यते। अस्याः टीकाया रचयिता ढुण्ढिराजशास्त्री। तत्रापि अस्याः समस्यायाः समाधानं परिदृश्यते। तेन भणितम्-**''अत्रेयमाशङ्कापदार्था इति उद्देशान्तरं 'उद्दिष्टस्य लक्षणं लक्षितस्य विभागः इति' नयेन लक्षणं विहाय कथं विभागकथनमिति। अत्र केषाञ्चित् उत्तरम्- तर्कसंग्रह इति वाक्यघटकीभूततर्कपदेन तल्लक्षणस्योक्तप्रायत्वात्। तथा हि तर्क्यन्ते ज्ञायन्ते इति व्युत्पत्त्या तर्कपदेन द्रव्यादिपदार्थाः उच्यन्ते, तेन ज्ञेयत्वं पदार्थसामान्यलक्षणं लभ्यत इति। अन्नंभट्टस्तु पदार्थपदेनैव पदस्यार्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वादिपदार्थसामान्यलक्षणं सूचितमिति न विभागोऽयुक्त इति समाधत्तेति बोध्यम्।"**[11] यद्यपि अत्र टीकारेण कुत्रापि निरुक्तिटीकायाः उल्लेखः न कृतः, परन्तु समाधानं दृष्ट्वा वक्तुं शक्यते विरलाटीकाकारेण निरुक्तिटीकायाः मतम् अत्र उल्लिखितम्। अत्रापि आदौ उल्लिखितस्य निरुक्तिटीकायाः समाधानस्य पुनरुल्लेखः प्राप्यते। तर्कसंग्रहग्रन्थस्य एका **लघुबोधिनीटीका** प्राप्यते। अस्याः टीकायाः स्रष्टा श्रीरङ्गदेशिकः।[12] अस्मिन् विषये तेन कथितम्-**"तर्कसंग्रह इत्यत्रोक्तव्युत्पत्त्या ज्ञेयत्वं पदार्थसामान्यलक्षणमित्युक्तत्वात्, यद्वा विभागवाक्यस्थपदार्थशब्देन पदस्यार्थः पदार्थः 'ऋ गतावति' धातोर्निष्पन्नस्यार्थशब्दस्य गत्यर्थकानां बुद्ध्यर्थकत्वात् ज्ञानविषयत्वमर्थः, संबन्धसामान्यवाचकषष्ठ्याः जन्यत्वमर्थः,अतः पदजन्यप्रतीतिविषयत्वं पदार्थसामान्यलक्षणमित्युच्यते।"**[13] अत्र विभागवाक्यस्य पदार्थपदेन पदार्थलक्षणं प्राप्यते। अत्र अर्थशब्दः ऋधातोः निष्पन्नः। अत्र अर्थशब्देन ज्ञानविषयत्वमर्थः प्राप्यते। संबन्धसामान्यवाचकषष्ठ्याः जन्यत्वमर्थः प्राप्यते। अतः पदजन्यप्रतीतिविषयत्वमिति सामान्यलक्षणं पदार्थपदेन प्राप्यते। अतः पदार्थलक्षणं तेन न उक्तम्।

## तर्कसंग्रहस्य आदौ द्रव्यादिपदार्थानाम् आलोचनायाः कारणविमर्शः-

तर्कसंग्रहकारेण अन्नंभट्टेन कथम् आदौ ग्रन्थे द्रव्यादिपदार्थाः आलोचिताः इति जिज्ञासा जायते। अन्नंभट्टेन तर्कसंग्रहग्रन्थस्य आदौ अस्मिन् विषये किमपि न उक्तम्। अतः टीकाकाराणां किम् अभिमतं तत् द्रष्टव्यम्। शोधपत्रेषु आलोचितासु टीकासु निरुक्तिटीकायाम् अस्य समाधानं प्राप्यते। तत्र प्राप्यते-**"तर्काणां द्रव्यादिपदार्थानां सङ्ग्रहस्तर्कसङ्ग्रहः इति तदर्थत्वात्। तथा च मोक्षप्रयोजकीभूतपदार्थविषयकतत्त्वज्ञानसंपादनाय अयं ग्रन्थः क्रियत इति भावः। ननु मोक्षे न पदार्थविषयकतत्त्वज्ञानमुपयुज्यते। आत्मविषयकज्ञानस्यैव मोक्षोपयोगितायाः श्रुतिसिद्धत्वादिति चेन्न। आत्मा इतरभिन्नः इत्याकारकात्मविषयकतत्त्वज्ञाने द्रव्यादिपदार्थविषयकतत्त्वज्ञानस्यैवोपयोगित्वात्।"**[14] अत्र यदि विचारः क्रियते तर्हि प्राप्यते यत् पदार्थतत्त्वज्ञानं मोक्षप्रयोजकम्। मोक्षशब्देन पूर्णरूपेण दुःखनिवृत्तिः बोध्यते। जनस्य मुख्यप्रयोजनं मोक्षः दुःखनिवृत्तिः वा। परन्तु दुःखनिवृत्तिहेतोः पदार्थज्ञानस्य मुख्यरूपेण नास्ति प्रयोजनम्। श्रुत्यादौ प्राप्यते आत्मतत्त्वज्ञानेन दुःखनिवृत्तिः भवति। दर्शनशास्त्रं मोक्षशास्त्ररूपेण ख्यातम्। दुःखनिवृत्तेः उपायप्रदर्शनं दर्शनशास्त्रस्य मुख्यप्रयोजनम्। आत्मस्वरूपस्य निवेदनं प्रत्यक्षरूपेणासम्भवमिति। आत्मा इतरभिन्नपदार्थः इति रूपेण यदि आत्मस्वरूपं

---

[10] तर्कसंग्रहः, सम्पादकः आचार्य श्रीनिवास शर्मा, पृष्ठासंख्या ८।

[11] तत्रैव, पृष्ठासंख्या ८।

[12] तर्कसंग्रहः, सम्पादकः आचार्य श्रीनिवासशर्मा, पृष्ठासंख्या प्रस्तावना १७।

[13] तत्रैव, पृष्ठासंख्या ८।

[14] तर्कसंग्रहः, सम्पादकः आचार्य श्रीनिवास शर्मा, पृष्ठासंख्या ५।

प्रदर्श्यते तर्हि आत्मतत्त्वनिवेदनं सम्भवम्। अत्र इतरशब्देन आत्मभिन्नपदार्थाः अर्थात् द्रव्यादिपदार्थाः बोध्यन्ते। द्रव्यादिपदार्थानां तत्त्वज्ञानात् अनन्तरम् आत्मज्ञानं यथार्थरूपेण जायते। अतः ग्रन्थस्य आदौ अन्नंभट्टेन पदार्थविषये आलोचना कृता।

## तर्कसंग्रहे पदार्थस्य भावाभावरूपेण विभागं परित्यज्य द्रव्यादिभेदेन आलोचनायाः कारणविमर्षः-

भारतीयदर्शनशास्त्रस्य इतिहासपर्यालोचनायां प्राप्यते प्रकरणग्रन्थाः सर्वेषु ग्रन्थेषु नवीनग्रन्थाः। न्यायवैशेषिकदर्शनशास्त्रस्य आलोचनायां प्रायः प्राप्यते पदार्थाः द्विविधाः भावाभावश्चेति।[15] जिज्ञासा जायते अन्नंभट्टेनोल्लिखिते 'द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः' इति अंशे कुत्रापि प्रत्यक्षरूपेण पदार्थस्य विभागः भावाभावरूपेण न प्राप्यते। अभावपदार्थस्य प्रत्यक्षोल्लेखः प्राप्यते परन्तु को भावपदार्थः तस्य परिचयोऽत्र प्रत्यक्षरूपेण न परिदृश्यते। शोधपत्रे आलोचितयोः टीकयोः अस्मिन् विषये कापि दिशा न निर्दिष्टा। तर्कसंग्रहस्य प्रतिबिम्बटीकायां अस्मिन् विषये उल्लिखितम्-"**अत्र सप्तमस्याभावरूपत्वाद् द्रव्यादीनां षण्णां भावत्वमिति भावाभावभेदाद् द्विविधाः पदार्थाः इति सूचितम्।**"[16] अत्र अन्नंभट्टेन पदार्थविभागक्रमे सप्तमपदार्थरूपेण अभावपदार्थस्य उल्लेखः कृतः। अभावपदेनैव अत्र द्रव्यादीनां षण्णां भावत्वम् सूचितम्। अतोऽत्र अभावपदेन पदार्थाः भावाभावभेदेन द्विविधा इति प्राप्यते।

## पदार्थस्वरूपविचारः-

यद्यपि ग्रन्थकारेण आदौ पदार्थलक्षणं विशेषरूपेण न कृतम् परन्तु शोधपत्रे आलोचितयोः टीकयोः किम् अभिमतं तत् द्रष्टव्यम्।

**दीपिकाटीकायां** पदार्थलक्षणम् उल्लिखितम्-"**पदस्यार्थः पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणम्।**"[17] पदार्थः इत्यस्य मूलं 'पद + अर्थः' इत्यस्मात् निर्मितम्। अत्र 'पदं' शब्दं दर्शयति, 'अर्थः' तु तस्य बोध्यं लक्ष्यं वा सूचयति। यस्य वस्तोः विशेषं पदेप्रयोगेन व्याख्यायते, स पदार्थः। दीपिकाटीकायां '**पदस्य अर्थः पदार्थः**' इति व्युत्पत्त्यनुसारम् '**अभिधेयत्वम्**' पदार्थस्य सामान्यलक्षणं स्वीकृतम्। पदेन ज्ञातः यः अर्थः स अभिधेयः। अत्र पदप्रयोगम् आवश्यकम्। सविकल्पकज्ञाने पदप्रयोगं भवति, न तु निर्वकल्पकज्ञान। अन्नंभट्टेन सविकल्पकज्ञानस्वरूपमुक्तम्- "**सप्रकारकं ज्ञानं सविकल्पकम्।**"[18] सप्रकारकम् अर्थात् नामजात्यादियुक्तानां ज्ञानं सविकल्पकज्ञानम्। यथा घटोऽयम्। वस्तुनां नामजात्यादिज्ञातुं पदप्रयोगम् आवश्यकम्। अन्नंभट्टेन निर्विकल्पकज्ञानस्वरूपमुक्तम्- "**निस्प्रकारकं ज्ञानं निर्विकल्पकम्।**"[19] निस्प्रकारकशब्देन नामजात्यादिरहितत्त्वं बोध्यते। किञ्चित् इदमिति ज्ञानम्। निर्विकल्पकज्ञाने पदप्रयोगं न भवति। यदि 'घटः' इति पदं वदामः, तर्हि तस्य अर्थः (पदार्थः) घटे अभिधेयः। अतः वक्तुं शक्यते '**अभिधेयत्वम्**' इति पदार्थस्वरूपं सविकल्पकज्ञाने प्रयुज्यते, न तु निर्विकल्पकज्ञाने।

**निरुक्तिटीकायां** पदार्थलक्षणं प्राप्यते-"**ज्ञेयत्वं पदार्थलक्षणम्।**"[20] निरुक्तिटीकानुसारं पदार्थस्य स्वरूपं ज्ञेयत्वेन निर्दिष्टं भवति। ज्ञानस्य विषयः यः सः ज्ञेयः। ज्ञेयस्य भावः ज्ञेयत्वमिति। जगति सर्वाणि वस्तुनि ज्ञानस्य विषयः भवति। अतः 'ज्ञेयत्व' इति धर्मः सर्वत्र विद्यते। **वक्तुं शक्यते 'ज्ञेयत्व' धर्मः वस्तोः सविकल्पकज्ञाने तथा च निर्विकल्पकज्ञाने प्रयुक्तः भवति।** ज्ञेयत्वं भौतिकदृष्ट्या वस्तुनां न केवलं स्वरूपं स्पष्टयति, अपि तु दार्शनिकदृष्ट्या वस्तूनां पदार्थत्वं सिद्धति।

तुलनात्मकमध्ययनेन कस्याः टीकायाः पदार्थलक्षणम् उत्तमं कथं च इत्यस्य विचारः मया अस्मिन् शोधपत्रे कर्तुमिष्यते। अत्र परिलक्ष्यते यत् दीपिकायामुल्लिखितं '**पदस्यार्थः पदार्थः**' इति रूपेण यदि पदार्थलक्षणं स्वीक्रियते तर्हि पदार्थस्वरूपं स्पष्टरूपेण न बोध्यते। यदि अभिधेयत्वमेव पदार्थलक्षणरूपेण स्वीक्रियते तर्हि निर्विकल्पज्ञाने विद्यमानस्य पदार्थस्य पदार्थत्वं न प्रामाणीभवति यतः निर्विकल्पज्ञाने कस्यापि वस्तुनः किञ्चिदिदमिति ज्ञानं भवति। अर्थात् ज्ञानेऽस्मिन् सुस्पष्टाभिधानं कर्तुं न शक्यते। अभिधानाभावात् पदार्थोभूत्वापि तस्य पदार्थत्वं नैव युज्यते। पदार्थलक्षणरूपेण ज्ञेयत्वस्य स्वीकारेण अनेन प्रकारेण समस्या न जायते। निर्विकल्पज्ञाने वस्तुनः यद्यपि सुस्पष्टाभिधानं नास्ति, परन्तु तस्य ज्ञानं भवति। अतः तस्य पदार्थत्वं प्रमाणीतं भवति। अतः निरुक्तिटीकायाम् उल्लिखितं-"**ज्ञेयत्वं पदार्थलक्षणम्।**"[21]उत्कृष्टमिति। अनेन पदार्थलक्षणेन सर्वेषां पदार्थानां पदार्थत्वं सिद्धति।

---

[15] न्यायप्रवेश, पृष्ठा-१५

[16] तर्कसंग्रहः, सम्पादकः आचार्य श्रीनिवास शर्मा, पृष्ठासंख्या ७।

[17] तर्कसंग्रहः, सम्पादकः- श्री यदुपति त्रिपाठी, पृष्ठासंख्या-२४।

[18] तर्कसंग्रहः, सम्पादकः- वालशास्त्री, पृष्ठासंख्या-५०।

[19] तर्कसंग्रहः, सम्पादकः- वालशास्त्री, पृष्ठासंख्या-४९।

[20] तर्कसंग्रहः, सम्पादकः- श्रीसत्कारिशर्मणा वङ्गीयेन, पृष्ठासंख्या-४।

[21] तर्कसंग्रहः, सम्पादकः- श्रीसत्कारिशर्मणा वङ्गीयेन, पृष्ठासंख्या-४।

## ग्रन्थानुक्रमणिका ॥


[1]. अन्नंभट्टः। *तर्कसंग्रहः* / सम्पा.अरविन्द वसु। कलकाता: मित्रम्, २०१०।

[2]. अन्नंभट्टः। *तर्कसंग्रहः* / सम्पा.आचार्य श्रीनिवास शर्मा। वाराणसी: भारतीय विद्या संस्थान, २००२।

[3]. अन्नंभट्टः। *तर्कसंग्रहः; तर्कसंग्रहदीपिका-न्यायबोधिनी-पदकृत्य-श्रीनिवासमुखोल्लासिनी(संस्कृत) तथा श्रीधरमुखोल्लासिनी(हिन्दी) व्याख्यासंवलित* । सम्पा.गोविन्दाचार्यः। वाराणसी: चौखम्वा सुरभारती प्रकाशन,२०१७ ।

[4]. अन्नंभट्टः। *तर्कसंग्रहः* / तृतीयसंस्करणस्य पुनर्मुद्रणम्। सम्पा.नारायणचन्द्रगोस्वामी। कलकाता: संस्कृत पुस्तक भाण्डार,२००६ ।

[5]. अन्नंभट्टः। *तर्कसंग्रहः;न्यायबोधिनी-पदकृत्यव्याख्योपेतः*। सम्पा.महादेवशर्मा। मुम्बइ: पाण्डुरङ्ग जावजी पाव्लिकेशन,१९२५।

[6]. अन्नंभट्टः।*तर्कसंग्रहः*। सम्पा.बालशास्त्री। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१३।

[7]. अन्नंभट्टः। *तर्कसंग्रहः*। सम्पा.श्रीयदुपति त्रिपाठी। कलिकाता: वि,एन्. पाव्लिकेशन्, २००९ ।

[8]. अन्नम्भट्टः। *तर्कसंग्रहः*। सम्पा.श्रीसत्कारिशर्मावङ्गीयः। वाराणसी: चौखाम्वा संस्कृतसंस्थानम्, २०१५।

[9]. अमरसिंहः। *अमरकोषः(सटीकानुवादः)*। सम्पा.गुरुदासविद्यानिधिः। कलकाता: संस्कृत पुस्तक भाण्डार, २०१०।

[10]. ईश्वरकृष्णः। *सांख्यतत्वकौमुदी(अध्यापनासहिता)*। सम्पा.नारायणचन्द्रगोस्वामी। कलकाता: संस्कृत पुस्तक भाण्डार, १९९९।

[11]. केशवमिश्रः। *तर्कभाषा* / सम्पा. सर्वानि गाङ्गुली विजया गोस्वामी च। कलकाता: संस्कृत पुस्तक भाण्डार, २००५ ।

[12]. केशवमिश्रः। *तर्कभाषा; प्रथम खण्ड* ।द्वितीयप्रकाशनम्। सम्पा.श्री गङ्गाधर कर न्यायाचार्य। कलकाता: यादवपुर विश्वविद्यालय प्रकाशना, २०१३।

[13]. गङ्गोपाध्याय मृणालकान्ति। *भाषापरिच्छेदे सप्त पदार्थ*। कलकाता: संस्कृत वुक डिपो, १४२१ वङ्गाब्दः।

[14]. गौतमः। *न्यायदर्शणम्(वात्सायन कृत भाष्यसह)*। अनुवादकः व्याख्याता च कालीवरवेदान्तवागीशः। कलकाता: संस्कृत पुस्तक भाण्डार, २०१६।

[15]. पाणिनिः। *अष्टाध्यायी* / सम्पा.तपनशङ्करभट्टाचार्य्यः। कलकाता: संस्कृत वुक डिपो, २०१२।

[16]. मण्डल, प्रद्योत कुमार। *भारतीय दर्शन*। कलकाता: प्रग्रसिभ पावलिशार्स। २०१४।

[17]. मनु। मनुसंहिता। सम्पा.ड. मानवेन्दुवन्द्योपाध्यायशास्त्री। कोलकाता: सदेश। १४१८ वङ्गाब्दः।

[18]. साहा, विश्वरूप। *मीमांसापरिचयः*। कलकाता: संस्कृत पुस्तक भाण्डारः, २००२।

[19]. सेन देवव्रत। *भारतीय दर्शन*। कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१४ आङ्गलाब्दः; तृतीयसंस्करणस्य द्वितीयमुद्रणम्।

[20]. *रुद्रयामलम् उत्तरतन्त्रम्( प्रथम भागः)*। सम्पादकः आचार्यश्रीरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, १९९१ ।

[21]. भट्टाचार्य, अमरेन्द्रमोहन। *न्यायप्रवेश*। कलकाता: संस्कृत पुस्तक भाण्डार, २००१।



***Cite this Article:***

*Das, N. (2026). दीपिकानिरुक्तिनयोः तर्कसंग्रहस्य पदार्थसमीक्षणम्। International Journal of Emerging Research in Arts, Science and Technology, 1(6), 1-5.*

***Journal URL:*** https://ijerast.com/ ***DOI:*** https://doi.org/10.67715/ijerast.v1i6.36



***Disclaimer/Publisher's Note:*** *The author(s) are solely responsible for the content and claims of this article. The publisher and editors assume no legal liability for any errors, copyright violations, or damages arising from its use.*